# कुमारसंभवः

## अष्टमः सर्गः

पाणिपीडनविधेरनन्तरं शैलराजदुहितुर्हरं प्रति ।

भावसाध्वसपरिग्रहादभूत्कामदोहदसुखं मनोहरम् ॥ ८.१ ॥

sādhvasa *n* – замешательство, тревога, страх;
dohada *m* – непреодолимое желание, страстное влечение;

व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका ।

सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिनः ॥ ८.२ ॥

pinākin *m* – обладатель лука Пинаки, эпитет Шивы;

कैतवेन शयिते कुतूहलात्पार्वती प्रतिमुखं निपातितम् ।

चक्षुरुन्मिषति सस्मितं प्रिये विद्युदाहतमिव न्यमीलयत् ॥ ८.३ ॥

kaitava - ложный, хитрый; *n* ложь, хитрость, обман;
kutūhala *n* – радость, удовольствие, восторг; любопытство, интерес;
un√miṣ P VI – открывать глаза;
ni√mīl P. I - закрывать глаза;

नाभिदेशनिहितः सकम्पया शंकरस्य रुरुधे तया करः ।

तद्दुकूलमथ चाभवत्स्वयं दूरमुच्छ्वसितनीविबन्धनम् ॥ ८.४ ॥

dukūla *n* – очень тонкая ткань;
nīvi *f* – широкий пояс;

एवमालि निगृहीतसाध्वसं शंकरो रहसि सेव्यतामिति ।

सा सखीभिरुपदिष्टमाकुला नास्मरत्प्रमुखवर्तिनी प्रिये ॥ ८.५ ॥

āli *f* – подруга;
ākula – смущенный;

अप्यवस्तुनि कथाप्रवृत्तये प्रश्नतत्परमनङ्गशासनम् ।

वीक्षितेन परिवीक्ष्य पार्वती मूर्धकम्पमयमुत्तरं ददौ ॥ ८.६ ॥

avastu *n* – вздор, пустяки;
anaṅgaśāsana – наказавший Каму, эпитет Шивы;

शूलिनः करतलद्वयेन सा संनिरुध्य नयने हृतांशुका ।

तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत् ॥ ८.७ ॥

vidhura – покинутый, удаленный, лишенный ч.-л.;

चुम्बनेष्वधरदानवर्जितं सन्नहस्तमदयोपगूहनम् ।

क्लिष्टमन्मथमपि प्रियं प्रभोर्दुर्लभप्रतिकृतं वधूरतम् ॥ ८.८ ॥

cumbana *n* – поцелуй;
adhara *m* - нижняя губа;
adaya – беспощадный, немилосердный;
upagūhana *n* – объятие;

यन्मुखग्रहणमक्षताधरं दानमव्रणपदं नखस्य यत् ।

यद्रतं च सदयं प्रियस्य तत्पार्वती विषहते स्म नेतरत् ॥ ८.९ ॥

sadaya – нежный, мягкий;

रात्रिवृत्तमनुयोक्तुमुद्यतं सा प्रभातसमये सखीजनम् ।

नाकरोदपकुतूहलं ह्रिया शंसितुं तु हृदयेन तत्वरे ॥ ८.१० ॥

anu√yuj U VII – спрашивать;

दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।

प्रेक्ष्य बिम्बमुपबिम्बमात्मनः कानि कानि न चकार लज्जया ॥ ८.११ ॥

darpaṇa *n* – зеркало;

नीलकण्ठपरिभुक्तयौवनां तां विलोक्य जननी समाश्वसत् ।

भर्तृवल्लभतया हि मानसीं मातुरस्यति शुचं वधूजनः ॥ ८.१२ ॥

वासराणि कतिचित्कथंचन स्थाणुना रतमकारि चानया ।

ज्ञातमन्मथरसा शनैःशनैः सा मुमोच रतिदुःखशीलताम् ॥ ८.१३ ॥

sthaṇu - непоколебимый, эпитет Шивы;

सस्वजे प्रियमुरो निपीडनं प्रार्थितं मुखमनेन नाहरत् ।

मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ॥ ८.१४ ॥

भावसूचितमदृष्टविप्रियं चाटुमत्क्षणवियोगकातरम् ।

कैश्चिदेव दिवसैस्तथा तयोः प्रेम गूढमितरेतराश्रयम् ॥ ८.१५ ॥

cāṭu *m, n* – любезность, вежливость; лесть;
kātara – боящийся ч.-л.;

तं यथात्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् ।

सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकनिवृत्तिः ॥ ८.१६ ॥

jāhnavī *f* – дочь Джахну, эпитет Ганги;
nirvṛtti – удовлетворенность, восхищение, покой;

शिष्यतां निधुवनोपदेशिनः शंकरस्य रहसि प्रपन्नया ।

शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम् ॥ ८.१७ ॥

दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा ।

शीतलेन निरवापयत्क्षणं मौलिचन्द्रशकलेन शूलिनः ॥ ८.१८ ॥

vedanā *f* – чувство; боль, страдание;
śakala *m, n* – осколок, половина;

चुम्बनादलकचूर्णदूषितं शंकरोऽपि नयनं ललाटजम् ।

उच्छ्वसत्कमलगन्धये ददौ पार्वतीवदनगन्धवाहिने ॥ ८.१९ ॥

alaka *m, n* – завиток, локон;
cūrṇa *m, n* – порошок, пыль (здесь порошок сандала);

एवमिन्द्रियसुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः ।

शैलराजभवने सहोमया मासमात्रमवसद् वृषध्वजः ॥ ८.२० ॥

सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखखेदितम् ।

तत्र तत्र विजहार संपतन्नप्रमेयगतिना ककुद्मता ॥ ८.२१ ॥

kakudmant – горбатый; *m* гора, буйвол;

मेरुमेत्य मरुदाशुगोक्षकः पार्वतीस्तनपुरस्कृतः कृती ।

हेमपल्लवविभङ्गसंस्तरानन्वभूत्सुरततत्परः क्षपाम् ॥ ८.२२ ॥

पद्मनाभवलयाऽङ्किताश्मसु प्राप्तवत्स्वमृतविप्रुषो नवाः ।

मन्दरस्य कटकेषु चावसत्पार्वतीवदनपद्मषट्पदः ॥ ८.२३ ॥

padmanābha *m* – с лотосом вместо пупка, эпитет Вишну;
viprus *f* – капля;
kaṭaka *m, n* – долина;

रावणध्वनितभीतया तया कण्ठसक्तदृढबाहुबन्धनः ।

एकपिङ्गलगिरौ जगद्गुरुर्निर्विवेश विशदाः शशिप्रभाः ॥ ८.२४ ॥

ekapiṅgala – эпитет Куберы (имеющий желтый знак у глаз). Гора Куберы – Гималаи;
jagadguru *m* - Учитель мира, эпитет Шивы;
viśada – светлый, чистый, понятный;

तस्य जातु मलयस्थलीरतेर्धूतचन्दनलतः प्रियाक्लमम् ।

आचचाम सलवङ्गकेसरश्चाटुकार इव दक्षिणानिलः ॥ ८.२५ ॥

lavaṅga – гвоздика (пряность), гвоздичное дерево;
kesara *n* – волосы; тычинки;
cāṭukāra *m* - льстец, подхалим;

हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा ।

सा व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ॥ ८.२६ ॥

tāmarasa *n* – золотой дневной цветок лотоса;
taraṅgiṇī *f* – река;
punarukta – сказанное снова, повторенное;

तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन् ।

नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ॥ ८.२७ ॥

pulomatanayā *f* – дочь Пуломана Шачи;
pārijāta *m* - эритрина, коралловое дерево;
yugma – парный, двойной;
suravadhū *f* - апсара;

इत्यभौममनुभूय शंकरः पार्थिवं च दयितासखः सुखम् ।

लोहितायति कदाचिदातपे गन्धमादनवनं व्यगाहत ॥ ८.२८ ॥

√lohitāya *den.* – краснеть;

तत्र काञ्चनशिलातलाश्रयो नेत्रगम्यमवलोक्य भास्करम् ।

दक्षिणेतरभुजव्यपाश्रयां व्याजहार सहधर्मचारिणीम् ॥ ८.२९ ॥

bhāskara *m* – солнце;

vyapāśraya *m* - место;

पद्मकान्तिमरुणत्रिभागयोः संक्रमय्य तव नेत्रयोरिव ।

संक्षये जगदिव प्रजेश्वरः संहरत्यहरसावहर्पतिः ॥ ८.३० ॥

tribhāga *m* – третья часть;
aharpati *m* – солнце;

सीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति ।

इन्द्रचापपरिवेषशून्यतां निर्झरास्तव पितुर्व्रजन्त्यमी ॥ ८.३१ ॥

sīkara (śīkara) *m* – брызги;
indracāpa *m, n* – лук Индры, радуга;

दष्टतामरसकेसरत्यजोः क्रन्दतोर्विपरिवृत्तकण्ठयोः ।

निघ्नयोः सरसि चक्रवाकयोरल्पमन्तरमनल्पतां गतम् ॥ ८.३२ ॥

nighna – преданный, подчиненный, зависимый;
cakravāka *m* – красноватый гусь, огарь; *согласно повериям, пары разлучаются ночью и соединяются утром;*

स्थानमाह्निकमपास्य दन्तिनः सल्लकीविटपभङ्गवासितम् ।

आविभातचरणाय गृह्णते वारि वारिरुहबद्धषट्पदम् ॥ ८.३३ ॥

sallakī *f* – лиана, которую любят есть слоны;
viṭapa *m* - сук, ветвь, куст;
vāsita – ароматный;

पश्य पश्चिमदिगन्तलम्बिना निर्मितं मितकथे विवस्वता ।

दीर्घया प्रतिमया सरोऽम्भसां तापनीयमिव सेतुबन्धनम् ॥ ८.३४ ॥

tapanīya - золотой;

उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः ।

दंष्ट्रिणो वनवराहयूथपा दष्टभङ्गुरबिसाङ्कुरा इव ॥ ८.३५ ॥

vini√kar P. VI – отбрасывать, оставлять;
palvala *n* - небольшой пруд или водоем;
ātapa *m* - зной, жара;
bhaṅgura – кривой, ломкий, непостоянный;
bisa *n* – стебель лотоса;

एष वृक्षशिखरे कृतास्पदो जातरूपरसगौरमण्डलः ।

हीयमानमहरत्ययातपं पीवरोरु पिबतीव बर्हिणः ॥ ८.३६ ॥

jātarūpa – золотой; *n* золото;
atyaya *m* - переход, конец;
barhin *m* – павлин;

पूर्वभागतिमिरप्रवृत्तिभिर्व्यक्तपङ्कमिव जातमेकतः ।

खं हृतातपजलं विवस्वता भाति किंचिदिव शेषवत्सरः ॥ ८.३७ ॥

आविशद्भिरुटजाङ्गणं मृगैर्मूलसेकसरसैश्च वृक्षकैः ।

आश्रमाः प्रविशदग्निधेनवो बिभ्रति श्रियमुदीरिताग्नयः ॥ ८.३८ ॥

uṭaja *m, n* - хижина из листьев;
aṅgaṇa *n* – двор;
sarasa - свежий, новый;
udīrita – поднятый;

बद्धकोशमपि तिष्ठति क्षणं सावशेषविवरं कुशेशयम् ।

षट्पदाय वसतिं ग्रहीष्यते प्रीतिपूर्वमिव दातुमन्तरम् ॥ ८.३९ ॥

sāvaśeṣa – оставшийся;
kuśeśaya *n* – дневной лотос;

दूरलग्नपरिमेयरश्मिना वारुणी दिगरुणेन भानुना ।

भाति केसरवतेव मण्डिता बन्धुजीवतिलकेन कन्यका ॥ ८.४० ॥

vāruṇī (diś) *f* – запад;
bandhujīva *m* - Pentapetes phoenicea, дерево с красными круглыми цветами;

सामभिः सहचराः सहस्रशः स्यन्दनाश्वहृदयंगमस्वनैः ।

भानुमग्निपरिकीर्णतेजसं संस्तुवन्ति किरणोष्मपायिनः ॥ ८.४१ ॥

syandana *m* – колесница;
parikīrṇa – окруженный;

सोऽयमानत शिरोधरैर्हयैः कर्णचामरविघट्टितेक्षणैः ।

अस्तमेति युगभुग्नकेसरैः संनिधाय दिवसं महोदधौ ॥ ८.४२ ॥

śirodhara *m* – шея;
vighaṭṭita – развязанный, открытый; сломанный, раненный;

खं प्रसुप्तमिव संस्थिते रवौ तेजसो महत ईदृशी गतिः ।

तत्प्रकाशयति यावदुद्गतं मीलनाय खलु तावतश्च्युतम् ॥ ८.४३ ॥

संध्ययाप्यनुगतं रवे र्वपुर्वन्द्यमस्तशिखरे समर्पितम् ।

येन पूर्वमुदये पुरस्कृता नानुयास्यति कथं तमापदि ॥ ८.४४ ॥

रक्तपीतकपिशाः पयोमुचां कोटयः कुटिलकेशि भान्त्यमूः ।

द्रक्ष्यसि त्वमिति सांध्यवेलया वर्तिकाभिरिव साधुवर्तिताः ॥ ८.४५ ॥

kapiśa - коричневый, красно-коричневый;
payomuc *m* – облако;
vartikā *f* - краска, цвет;

सिंहकेसरसटासु भूभृतां पल्लवप्रसविषु द्रुमेषु च ।

पश्य धातुशिखरेषु भानुना संविभक्तमिव सांध्यमातपम् ॥ ८.४६ ॥

saṭā *f* – коса, грива, множество;

अद्रिराजतनये तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः ।

ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ॥ ८.४७ ॥

तन्मुहूर्तमनुमन्तुमर्हसि प्रस्तुताय नियमाय मामपि ।

त्वां विनोदनिपुणः सखीजनो वल्गुवादिनि विनोदयिष्यति ॥ ८.४८ ॥

valgu – милый, приятный, красивый;

निर्विभुज्य दशनच्छदं ततो वाचि भर्तुरवधीरणापरा ।

शैलराजतनया समीपगामाललाप विजयामहेतुकम् ॥ ८.४९ ॥

daśanacchada *m* – губа;
avadhīraṇa *n* - презрение, пренебрежение;
vijayā *f – nom.pr.;*

ईश्वरोऽपि दिवसात्ययोचितं मन्त्रपूर्वमनुतस्थिवान्विधिम् ।

पार्वतीमवचनामसूयया प्रत्युपेत्य पुनराह सस्मितम् ॥ ८.५० ॥

मुञ्च कोपमनिमित्तकोपने संध्यया प्रणमितोऽस्मि नान्यया ।

किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ॥ ८.५१ ॥

निर्मितेषु पितृषु स्वयंभुवा या तनुः सुतनु पूर्वमुज्झिता ।

सेयमस्तमुदयं च सेवते तेन मानिनि ममात्र गौरवम् ॥ ८.५२ ॥

तामिमां तिमिरवृद्धिपीडितां भूमिलग्नमिव सम्प्रति स्थिताम् ।

एकतस्तटतमालमालिनीं पश्य धातुरसनिम्नगामिव ॥ ८.५३ ॥

tamāla – *nom.pr.* название дерева;
mālinī *f nom.pr.* название реки;
nimnagā *f* – река;

सांध्यमस्तमितशेषमातपं रक्तलेखमपरा बिभर्ति दिक् ।

संपरायवसुधासशोणितं मण्डलाग्रमिव तिर्यगुत्थितम् ॥ ८.५४ ॥

saṃparāya *m* – смерть, битва;

यामिनीदिवससंधिसंभवे तेजसि व्यवहिते सुमेरुणा ।

एतदन्धतमसं निरङ्कुशं दिक्षु दीर्घनयने विजृम्भते ॥ ८.५५ ॥

yāminī *f* – ночь;
niraṅkuśa - не знающий оков, неограниченный, полностью свободный;

नोर्ध्वमीक्षणगतिर्न चाप्यधो नाभितो न पुरतो न पृष्ठतः ।

लोक एष तिमिरोल्बवेष्टितो गर्भवास इव वर्तते निशि ॥ ८.५६ ॥

garbhavāsa *m* - утроба, матка, чрево;

शुद्धमाविलमवस्थितं चलं वक्रमार्जवगुणान्वितं च यत् ।

सर्वमेव तमसा समीकृतं धिङ् महत्त्वमसतां हतान्तरम् ॥ ८.५७ ॥

āvila - мутный, тусклый;

नूनमुन्नमति यज्वनां पतिः शार्वरस्य तमसो निषिद्धये ।

पुण्डरीकमुखि पूर्वदिङ्मुखं कैतकैरिव रजोभिरावृतम् ॥ ८.५८ ॥

ketaka *m,* ketakī *f* – Pandanus odoratissimus;

मन्दरान्तरितमूर्तिना निशा लक्ष्यते शशभृता सतारका ।

त्वं मया प्रियसखीसमागता श्रोष्यतेव वचनानि पृष्ठतः ॥ ८.५९ ॥

रुद्धनिर्गमनमा दिनक्षयात्पूर्वदृष्टतनुचन्द्रिकास्मितम् ।

एतदुद्गिरति चन्द्रमण्डलं दिग्रहस्यमिव रात्रिचोदितम् ॥ ८.६० ॥

पश्य पक्वफलिनीफलत्विषा बिम्बलाञ्छितवियत्सरोम्भसा ।

विप्रकृष्टविवरं हिमांशुना चक्रवाकमिथुनं विडम्ब्यते ॥ ८.६१ ॥

शक्यमोषधिपतेर्नवोदया कर्णपूररचनाकृते तव ।

अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसंपुटैः कराः ।। ८.६२ ।।

अङ्गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः ।

कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥ ८.६३ ॥

kuḍmala - распускающийся, раскрывающийся (о цветке); *m* почка, бутон;

पश्य पार्वति नवेन्दुरश्मिभिः सामिभिन्नतिमिरं नभस्तलम् ।

लक्ष्यते द्विरदभोगदूषितं संप्रसीदमिव मानसं सरः ॥ ८.६४ ॥

रक्तभावमपहाय चन्द्रमा जात एष परिशुद्धमण्डलः ।

विक्रिया न खलु कालदोषजा निर्मलप्रकृतिषु स्थिरोदया ॥ ८.६५ ॥

उन्नतेषु शशिनः प्रभा स्थिता निम्नसंश्रयपरं निशातमः ।

नूनमात्मसदृशी प्रकल्पिता वेधसा हि (१)गुणदोषयोर्गतिः ॥ ८.६६ ॥

चन्द्रपादजनितप्रवृत्तिभिश्चन्द्रकान्तजलबिन्दुभिर्गिरिः ।

मेखलातरुषु निद्रितानमून्बोधयत्यसमये शिखण्डिनः ॥ ८.६७ ॥

कल्पवृक्षशिखरेषु संप्रति प्रस्फुरद्भिरिव पश्य सुन्दरि ।

हारयष्टिरशनामिवांशुभिः कर्तुमागतकुतूहलः शशी ॥ ८.६८ ॥

उन्नतावनतभाववत्तया चन्द्रिका सतिमिरा गिरेरियम् ।

भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तहस्तिनः ॥ ८.६९ ॥

एतदुच्छ्वसितपीतमैन्दवं सोढुमक्षममिव प्रभारसम् ।

मुक्तषट्पदविरावमञ्जसा भिद्यते कुमुदमानिबन्धनात् ॥ ८.७० ॥

पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।

मारुते चलति चण्डि केवलं व्यज्यते विपरिवृत्तमंशुकम् ॥ ८.७१ ॥

शक्यमङ्गुलिभिरुत्थितैरधः शाखिनां पतितपुष्पपेशलैः ।

पत्रजर्जरशशिप्रभालवैरेभिरुत्कचयितुं तवालकान् ॥ ८.७२ ॥

एष चारुमुखि  योगतारया युज्यते तरलबिम्बया शशी ।

साध्वसादुपगतप्रकम्पया कन्ययेव नवदीक्षया वरः ॥ ८.७३ ॥

पाकभिन्नशरकाण्डगौरयोरुल्लसत्प्रकृतिजप्रसादयोः ।

रोहतीव तव गण्डलेखयोश्चन्द्रबिम्बनिहिताक्षि चन्द्रिका ॥ ८.७४ ॥

लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।

त्वामियं स्थितिमतीमुपागता गन्धमादनवनाधिदेवता ॥ ८.७५ ॥

आर्द्रकेसरसुगन्धि ते मुखं मत्तरक्तनयनं स्वभावतः ।

अत्र लब्धवसतिर्गुणान्तरं किं विलासिनि मधु करिष्यति ॥ ८.७६ ॥

मान्यभक्तिरथवा सखीजनः सेव्यतामिदमनङ्गदीपनम् ।

इत्युदारमभिधाय शंकरस्तामपाययत पानमम्बिकाम् ॥ ८.७७ ॥

पार्वती तदुपयोगसंभवां विक्रियामपि सतां मनोहराम् ।

अप्रतर्क्यविधियोगनिर्मितामाम्रतेव सहकारतां ययौ ॥ ८.७८ ॥

तत्क्षणं विपरिवर्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।

सा बभूव वशवर्तिनी द्वयोः शूलिनः सुवदना मदस्य च ॥ ८.७९ ॥

घूर्णमाननयनं स्खलत्कथं स्वेदबिन्दुमदकारणस्मितम् ।

आननेन न तु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥ ८.८० ॥

तां विलम्बितपनीयमेखलामुद्वहञ्जघनभारदुर्वहाम् ।

ध्यानसंभृतविभूतिरीश्वरः प्राविशन्मणिशिलागृहं रहः ॥ ८.८१ ॥

तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।

अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः ॥ ८.८२ ॥

क्लिष्टचन्द्रमदयैः कचग्रहैर् व्यत्ययार्पितनखं समत्सरम् ।

तस्य तच्छिदुरमेखलागुणं पार्वतीरतमभून्न तृप्तये ॥ ८.८३ ॥

केवलं प्रियतमादयालुना ज्योतिषामवनतासु पङ्क्तिषु ।

तेन तत्प्रतिगृहीतवक्षसा नेत्रमीलनकुतूहलं कृतम् ॥ ८.८४ ॥

स व्यबुध्यत बुधस्तवोचितः शातकुम्भकमलाकरैः समम् ।

मूर्च्छनापरिगृहीतकैशिकैः किन्नरैरुषसि गीतमङ्गलः ॥ ८.८५ ॥

तौ क्षणं शिथिलितोपगूहनौ दंपती चलितमानसोर्मयः ।

पद्मभेदपिशुनाः सिषेविरे गन्धमादनवनान्तमारुताः ॥ ८.८६ ॥

ऊरुमूलनखमार्गराजिभिस्तत्क्षणं हृतविलोचनो हरः ।

वाससः प्रशिथिलस्य संयमं कुर्वतीं प्रियतमामवारयत् ॥ ८.८७ ॥

स प्रजागरकषायलोचनं गाढदन्तपरिताडिताधरम् ।

आकुलालकमरंस्त रागवान्प्रेक्ष्य भिन्नतिलकं प्रियामुखम् ॥ ८.८८ ॥

तेन भङ्गिविषमोत्तरच्छदं मध्यपिण्डितविसूत्रमेखलम् ।

निर्मलेऽपि शयनं निशात्यये नोज्झितं चरणरागलाञ्छितम् ॥ ८.८९ ॥

स प्रियामुखरसं दिवानिशं हर्षवृद्धिजननं सिसेविषुः ।

दर्शनप्रणयिनामदृश्यतामाजगाम विजयानिवेदनात् ॥ ८.९० ॥

समदिवसनिशीथं सङ्गिनस्तत्र शंभोः

शतमगमदृतूनां साग्रमेका निशेव ।

न तु सुरतसुखेभ्य श्छिन्नतृष्णो बभूव

ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः ॥ ८.९१ ॥